aglasem.com

FOR TS CLASS 11 PREPARATION

TS Inter 1st Year Model Paper 2027 Sanskrit

EXAM	YEAR	TYPE	SUBJECT
TS Class 11	2027	Sample Paper	Sanskrit

Board of Intermediate Education - Telangana

INTERMEDIATE - FIRST YEAR

SECOND LANGUAGE - SANSKRIT : PART-II - PAPER-I

आदर्शप्रश्नपत्रम् - संस्कृतम्

MODEL PAPER - SANSKRIT

(w.e.f. 2026-27)

Time: 3 Hrs. Max. Marks: 80

सूचना :- प्रथमद्वितीयतृतीयपञ्चदशप्रश्नान् विहाय सर्वे प्रश्नाः संस्कृतभाषयैव समाधातव्याः।

Note: Except Q.Nos. 1, 2, 3 and 15 all other questions should be answered in Sanskrit (Devnagari Script) only

I. एकस्य श्लोकस्य भावं लिखत । 1×4=4

1. अपि स्वर्णमयी लङ्का न मे लक्ष्मण रोचते ।
   जननी जन्मभूमिश्च स्वर्गादपि गरीयसी ।।
2. शान्ति तुल्यं तपो नास्ति न सन्तोषात्परं सुखम् ।
   न तृष्णायाः परो व्याधिः न च धर्मो दयासमः ।।

II. एकं निबन्धप्रश्नं समाधत्त । 1×5=5

1. माल्यवतः वचनानि संग्रहेण विवृणुत ।
2. गुलाबरावस्य जीवनविशेषान् विशदयत ।

III. एकं निबन्धप्रश्नं समाधत्त । 1×5=5

1. चिक्रोडस्य कथां लिखत ।
2. विजयसिंहः जीर्णच्छत्रस्य रक्षणेन किं प्राप्तवान् विशदयत ।

IV. द्वौ लघुप्रश्नौ समाधत्त । 2×3=6

1. पद्माकरं कः विकचीकरोति ?
2. किं कुर्वन् महदैश्वर्यमश्नुते ?

3. शतरूपापतेः पुत्रौ कौ ?

4. केषां पूजा बहुमता ?

V. द्वौ लघुप्रश्नौ समाधत्त । **2×3=6**

1. गजेन्द्रःकुत्र वसति स्म ?

2. विशालः शाल्मलीतरुः कुत्र अस्ति ?

3. महर्षिः कणादः कस्य दर्शनस्य प्रवक्ता ?

4. रेलयाने कीदृशाः चोराः पलायनं चक्रुः ?

VI. द्वे ससन्दर्भं व्याख्यात । **2×2=4**

1. करिष्यामि यत्किमपि साहाय्यम् ।

2. अयं ग्राहः मम विषये मृत्युरिवागतः ।

3. अहं धर्मशास्त्रमपि अधीतवान् ।

4. सः गृहं गृहं चरित्वा प्रजानाम् आरोग्यं विचारयति स्म ।

VII. एकेन पदेन समाधत्त । **5×1=5**

1. मातेव का रक्षति ?

2. रामं कं मन्यामहे ?

3. कः दश श्रोत्रियान् अतिरिच्यते ?

4. भृत्यानुरक्तः कः ?

5. नित्यं तमो विनाशः केन क्रियते ?

VIII. एकेन पदेन समाधत्त । **5×1=5**

1. श्रीरामचन्द्रः सेतुबन्धनं कैः प्रारेभे ?

2. अगस्त्यः कैः सह तत्रागच्छत् ?

3. लघुपतनकः कः ?

4. के रक्षकभटैः निगृहीताः ?
5. नाट्यशास्त्रं कः विरचितवान् ?

IX. पञ्च प्रश्नाः समाधेयाः । **5×2=10**

1. वेदाः कस्याः मूलाधाराः ?
2. वसन्तपुरे कः निर्धनः आसीत् ?
3. विश्वेश्वरय्यः कं ग्रन्थं विरचतिवान् ?
4. कस्मात् सञ्जायते सुखम् ?
5. मुम्बई प्रशासकः कस्य सहाय्यं याचितवान् ?
6. का सेवा जनार्दनसेवा भवति ?
7. मैत्रेयी सीतायां कथं स्निह्यति स्म ?
8. पुरा केरलेषु कः नृपतिः आसीत् ?

X. द्वयोः शब्दयोः अन्त-लिङ्ग-वचन-निर्देशसहितं रूपाणि लिखत । **2×3=6**

1. देव 2. मति 3. मधु 4. अस्मद्

XI. द्वयोः धात्वोः निर्दिष्टानि लकाररूपाणि लिखत । **2×3=6**

1. भवति 2. अपिबत् 3. गच्छेत् 4. वन्दताम्

XII. त्रीणि सन्धिनामनिर्देशसहितं विघटयत । **3×2=6**

1. सुरारिः 2. महोदयम् 3. लतैव
4. इत्यत्र 5. गायकः 6. गोऽग्रम्

XIII. त्रीणि सन्धिनामनिर्देशसहितं सन्धत्त । **3×2=6**

1. रवि + इन्द्रः 2. राज + ऋषिः 3. गङ्गा + ओघः
4. अभि + उन्नतिः 5. हरे + ए 6. गते + अपि

XIV. संवित्परीक्षा – अधोनिर्दिष्ट कथां पठित्वा प्रश्नान् समाधत्त । 3×1=3

सर्वोपनिषदो गावो दोग्धा गोपालनन्दनः ।
पार्थो वत्सः सुधीर्भोक्ता दुग्धं गीतामृतं महत् ।।

पाण्डवानां कौरवाणां च मध्ये कुरुक्षेत्रयुद्धं प्राचलत् । स्वबान्धवान् युद्धे हन्तुम् अनिच्छन् अर्जुनः युद्धं त्यक्तुं प्रयतते । तस्मिन् समये श्रीकृष्णः तं स्वधर्मपरिपालनमेव श्रेयः इति बोधयति । भगवता श्रीकृष्णेन कुरुक्षेत्रे अर्जुनाय भगवद्गीता उपदिष्टा । भगवद्गीता महाभारते भीष्मपर्वणि वर्तते । भगवद्गीतायाम् अष्टादश अध्यायाः सन्ति । सप्तशतं श्लोकाः वर्तन्ते । भगवद्गीता सर्वेषां मार्गदर्शनं करोति । भगवद्गीता न केवलम् आध्यात्मिकज्ञानम् अपि तु नैतिकमूल्यानि च बोधयति ।

1. भगवद्गीता अर्जुनाय केन उपदिष्टा ?
2. भगवद्गीता महाभारते कस्मिन् पर्वणि वर्तते ?
3. भगवद्गीतायां कति अध्यायाः सन्ति ?

XV. अधोनिर्दिष्टेषु त्रीणि वाक्यानि अनुवदत । 3×1=3

1. धैर्यं सर्वस्य साधनम् ।
2. दया हि परमो धर्मः ।
3. गावः विश्वस्य मातरः ।
4. आरोग्यं भास्करात् इच्छेत् ।
5. जगतः पितरौ वन्दे ।

